International Journal of Sanskrit Research 2016; 2(6): 21-23

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(6): 21-23
© 2016 IJSR
www.anantaajournal.com
Received: 08-09-2016
Accepted: 09-10-2016

**कल्पना**
शोधच्छात्रा साहित्यविभागः
वेदव्यासपरिसरः, हिमाचलप्रदेशः

**Correspondence**
**कल्पना**
शोधच्छात्रा साहित्यविभागः
वेदव्यासपरिसरः, हिमाचलप्रदेशः

# व्याकरणोदाहरणार्थज्ञाने उदाहरणकाव्यानामुपयोगिता

## कल्पना

सरसरीत्या व्याकरणप्रक्रियां शिक्षयितुं व्याकृतानां पदानां प्रयोगाभ्यासं च कारयितुं प्राचीनकालत एव व्याकरणोदाहरणसमापनीयानां काव्यानां रचनायाः परम्परा विद्यते। एतेषु वैयाकरणशिरोमणि– महाकविभट्टिप्रणीतं रावणवधं नाम भट्टिकाव्यम्, शारदादेशवास्तव्येन व्याकरणार्णवकर्णधारेण महाकविना भूमभट्टेन रचितं रावणार्जुनीयापरनामधेयम् अर्जुनरावणीयं महाकाव्यम्, कलिकालसर्वज्ञ इति विरुदविभूषितेन सूरीश्वरेण हेमचन्द्राचार्येण कृतं द्व्याश्रयमहाकाव्यम्, केरलाभिजनेन ब्रह्मदत्तसूनुना नारायणकविना रचितं सुभद्राहरणं महाकाव्यम्, केरलवास्तव्येन वासुदेवकविना प्रणीतं वासुदेवविजयं नाम काव्यम्, नारायणभट्टप्रणीतं धातुकाव्यम् इतीमानि व्याकरणोदाहरणकाव्यानि सुविख्यातानि सन्ति।
प्राचीनकाले खल्वियं परम्परा विपुलसङ्ख्यैरीदृशैः काव्यरत्नैः सुतरां सम्पन्नाभूत्। सम्प्रति तेषूपरिनिर्दिष्टानि कानिचिदेवावशिष्टानि। टीकाकारशिरोमणिर्महोपाध्यायो मल्लिनाथ एतादृशं व्याकरणोदाहरणसमापनीयं काव्यम् उदाहरणकाव्यम् इति व्यपदिशति भट्टिकाव्यव्याख्यारम्भे।
'रामकथामाश्रित्य पाणिनीयसूत्राणामुदाहरणं काव्यं चिकीर्षुः' भट्टिकाव्यम्, मल्लिनाथकृतसर्वपथीन व्याख्योपेतम्[1]–
प्राक्तनानां बहूनां लुप्तानाम् उदाहरणकाव्यानां श्रवणरमणीयानि सहृदयहारीणि पद्यानि यत्र तत्र प्रकीर्णमणिरूपेण विद्वज्जनलोचनगोचराणि सन्ति बलादिवावर्जयन्ति सचेतसां चेतांसि। यथा–

**शृङ्गारप्रकाशः**
'अक्षशलाकासंख्याः परिणा' [2] अस्य सूत्रस्योदाहरणानि भोजदेवस्य शृङ्गारप्रकाशे समुद्धृते निम्नश्लोके मनोहारितया प्रयुक्तानि–

> शलाकापर्यभिद्यूतं चतुष्पर्यक्षपर्यपि।
> विपर्यस्ते विधौ पश्य नलादेरपि जायते।।[3]

तथा च–

> दण्डादण्डि न कुर्वन्ति न कचाकचि कोकिलाः।
> तथापि जितमेवैभिर्वाग्भिरेव जगत्त्रयम्।।[4]

अत्र 'तत्र तेनेदमिति सरूपे'[5] इत्यस्य द्वे उदाहरणे सुतरां हृदयग्राहितया प्रयुक्ते।

**भट्टिकाव्यम्:** पाणिनीयसूत्रोदाहरणभूतानि पदानि उपयुज्य सूत्रोदाहरणकाव्यरचना अपि प्राचीने काले समुद्भूता। अस्या एव परम्परायाः भट्टिप्रणीतं महाकाव्यं रावणवधापरपर्यायं भट्टिकाव्यमीदृशरचनायाः प्रसिद्धमुदाहरणं भवितुमर्हति। काव्यमिदं द्वाविंशतिसर्गात्मकमस्ति। काव्यमिदं कवेः एकमात्रकृतिरस्ति। महाकाव्यस्य इतिवृत्तं वाल्मीकिरामायणतो गृहीतवानस्ति। रामचन्द्रस्य जन्मतः समारभ्य राज्याभिषेकं यावद् इयं रमणीया कथा पंचविंशत्युत्तरषोडशशतसंख्याकाः (1625) श्लोकसहिताः। अत्र महाकाव्योचितसमस्तगुणानाम् आधानं निहितम्। भट्टिकाव्यं चतुर्धा विभक्तम्–
प्रकीर्णकाण्डम् (1–5 सर्गपर्यन्तम्) अधिकारकाण्डम् (6–9 सर्गपर्यन्तम्)
प्रसन्नकाण्डम् (10–13 सर्गपर्यन्तम्) तिङन्तकाण्डम् (14–22 सर्गपर्यन्तम्)

---

1 1.1
2 अष्टा. 2.1.10
3 शृङ्गारप्रकाशः, द्वितीयः प्रातिपदिकप्रकाशः श्लोक संख्या–52
4 शृङ्गारप्रकाशः, द्वितीयः प्रातिपदिकप्रकाशः श्लोक संख्या–54
5 अष्टा. 2.2.27

**अर्जुनरावणीयम्**
भट्टिकाव्यादनन्तरम् इदम् अर्जुनरावणीयं महाकाव्यमायाति उदाहरणकाव्यपरम्परायाम्। काश्मीरकाश्यपीवास्तव्यो वैयाकरण–शिरोमणिर्महाकविर्भूमभट्टो अर्जुनरावणीयं नाम विलक्षणं महाकाव्यं विरचयांचकार। अत्र काव्यकथाम् अष्टाध्यायीसूत्रपाठक्रमेणोदाहरणानि गुम्फितानि। पुरा काश्मीरेषु बङ्गेषु केरलेषु चास्य भूयान् प्रचारोऽभूत्। उदीच्यमातृकाणां पुष्पिकासु अर्जुनरावणीयं रावणार्जुनीयम् इत्युभयथापि व्यवहारो दृश्यते। अर्जुनश्च रावणश्च अर्जुनरावणौ तावधिकृत्यं कृतं काव्यम् अर्जुनरावणीयम्। अस्मिन् काव्ये सप्तिविंशतिः सर्गाः सन्ति, 1726 श्लोकाश्च सन्ति।

**पाणिनीयसूत्रोदाहरणम्ः** इदं काव्यं कडल्लूरवासिनो नम्बूदरिपादपरिवारस्य गृहात् मातृकारूपेण प्राप्तम्, सम्प्रति चेदं मद्रासराजकीयहस्तलेखागारे (मद्रासविश्वविद्यालयपरिसरस्थे) विद्यते। तत्रास्य संख्या– 3066 इत्यस्ति।

**वासुदेविवजयम्**
केरलप्रान्ते षोडश्यां शताब्यां रचितं काव्यमिदं विलक्षणशैल्या पाणिनीयव्याकरणोदाहरणानि सरसतया प्रदर्शयितुं नितरां महत्त्वपूर्णमस्ति। उदाहरणकाव्यस्य अर्थावबोधाय अस्य काव्यस्य पदचन्द्रिकाभिधाना व्याख्यापि वासुदेवकविना स्वयमेव व्यरचि। अत्र भगवतो वासुदेवस्य पावनं चरितमवलम्ब्य सम्पूर्णापि अष्टाध्यायी प्रयोगतः रचिता।

**सुरूपराघवम्ः** इदं केरलेषु रचितं व्याकरणोदाहरणकाव्यमस्ति। अस्य रचयिता इलत्तूर रामस्वामी शास्त्री अस्ति। काव्यकर्त्तुः कवेः कालोऽष्टादश्याः खिष्टास्तशताब्द्या अन्तिमभागो मन्यते। रचनेयमपरिमाणं गुणगरिमाणं बिभ्राणा विभ्राजते। परमस्य अष्टावेव सर्गाः उपलभ्यन्ते, ते च सम्पादिताः प्रकाशिताश्च। काव्यस्य रचनातीव मधुरा कौशलपूर्णा चास्ति। अत्र उदाहरणानि अति मनोहारितया निबद्धानि।
अस्योदाहरणकाव्यस्य सम्पूर्णस्य रचना कविना कृताभूदिति केरलसाहित्य– चरित्रकर्त्ता कथयति। सम्प्रति खल्वस्यान्वेषणं कृत्वा सम्पूर्णं काव्यं सम्यक् सम्पाद्य प्रकाश्येत चेदिदं वैयाकरणानां भूयसे उपकाराय भविष्यति।
एतेन स्पष्टमस्ति यत् व्याकरणोदाहरणकाव्यानामनुशीलनेन उदाहरणार्थविषये विशेषेण स्पष्टता विशदता च जायते। यतो हि तत्र उदाहरणप्रयोगः विविधरूपेण दृश्यते। एतादृशं प्रयोगविषयं दृष्ट्वा छात्रस्य बुद्धिः विशेषेण विविधप्रयोगेषु प्रसरति। उदाहरणविषयकं ज्ञानं च व्यापकं भवति। एतेन व्याकरणज्ञानमपि सुदृढं जायते। अतः व्याकरणोदाहरणार्थस्पष्टीकरणविषये पूर्वचर्चितानामुदाहरणकाव्यानां महती उपयोगिता विद्यते।
सुप् प्रतिना मात्रार्थे[6]अस्य सूत्रस्य काव्यगतप्रयोगाः–

**अर्जुनरावणीये**
वयं पुरैक्षामहि सप्तगङ्गं प्रभो यथा पंचनदं तथाद्य।
न यत्र पापप्रति नर्मदां तां पश्येम राजेति कयाचिदूचे।।[7]

अत्रोक्तम् – यत्र यस्यां न पापप्रति अल्पमपि पापं न वर्त्तते तथाभूतां नर्मदां वयं पश्येम।

**द्व्याश्रयमहाकाव्ये**
अनुस्वाम्यनुनद्यास्ते तिष्ठद्ग्वपि वहद्ग्विव।
युध्यमाना अमन्यन्त धारयन्तः श्रमप्रति।।[8]

श्रमप्रति खेदादल्पत्वं धारयन्तः।

6 अष्टा. 2.1.9
7 अर्जुनरावणीयम् 4.12
8 द्व्याश्रयमहाकाव्यम् 5.38

**वासुदेवविजये**
विषयान् परिगृह्य यावदर्थं सलिलप्रत्युपभुज्य मासिकादीन्।
नियमान् दधतः पदं ह भेजुर्द्विजमुख्यास्तदबिभ्यतः परेभ्यः।।[9]

सलिलप्रति किंचित् सलिलमुपभुज्य।

**सुभद्राहरणे**
जलप्रति प्राश्य कृतासुधारणैस्तपश्चरद्भिर्मुनिभिः क्वचिद्युतम्।
क्वचिद् द्विपर्यक्षपरीति जल्पता गुहागृहे दिव्यजनेन दीव्यता।।[10]

जलप्रति उदकस्तोकम्। अत्र लवार्थवृत्तिना प्रतिनाव्ययीभावः। एवंकृत्वा उदाहरणार्थज्ञाने वैशद्यमागच्छति।
उपज्ञोपक्रमं तदाद्याचिख्यासायाम् [11] – उदाहरणानामर्थप्रयोगपरिशीलनविषये यथा–

**भट्टिकाव्ये**
नृपात्मजौ चिक्लिशतुः ससीतौ ममार राजा विधवा भवत्यः।
शोच्या वयं भूरनृपा लघुत्वं केकय्युपज्ञं बत बह्वनर्थम्।।[12]

उपज्ञायत इत्युपज्ञा। कैकेय्या उपज्ञा कैकेय्युपज्ञम्।

**अर्जुनरावणीये**
यदुपज्ञमिवाभाति राज्यं रंजितमानवम्।
मन्ये मानितसर्वार्थि दानं च यदुपक्रमम्।।[13]

रंजितमानवं राज्यं यदुपज्ञमिवाभाति। मानवरंजनं यदाद्यारब्धमिवाभाति।

**चम्पूरामायणे**
मुनिः कृशाश्वोपज्ञानि ताटकामाथिने ददौ।
अस्त्राणि जृम्भकादीनि जम्भशासनशासनात्।।[14]

कृशाश्वस्योपज्ञा कृशाश्वोपज्ञानि।

**वासुदेवविजये**
मनुमाप्तगुरूपज्ञं जपन्त्यः साधु सैकते।
असपर्यन्नमूः कालीं नियोज्या सस्मरपत्त्रिणाम्।।[15]

आप्तगुरूपज्ञमिति– इष्टेन गुरुणा उपज्ञेयं परिच्छेद्यं तदुपदिष्टम्।

**पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे।।[16]**
अथ प्रयोगाः–

**भट्टिकाव्ये**
उपास्थिषत सम्प्रीताः पूर्वाह्णे रोषवाहणम्।
राक्षसाः कपिमादाय पतिं रुधिरपायिणाम्।।[17]

पूर्वोऽह्नः पूर्वाह्णः। एकदेशिसमासः। पूर्वाह्णे प्रत्यूषसि।

9 वासुदेवविजयम् 4.4
10 सुभद्राहरणम् 10.6
11 अष्टा.2.4.21
12 भट्टिकाव्य 3.31
13 अर्जुनरावणीयम् 7.25
14 चम्पूरामायणम् 1.44
15 वासुदेवविजयम् 6.144
16 अष्टा. 2.1.1
17 भट्टिकाव्यम् 9.95

**अर्जुनरावणीये**

अवनेरवमुच्य पूर्वकायं किरणौघोऽपरकायमाप भानोः।
तमनुप्रययुस्तमांसि दूरे करिवृन्दानि शनैर्भियेव सिंहम्।।[18]
पूर्वकायमवमुच्य अपरकायमाप।
तमसाधरकायमावृतं तं किरणैरुत्तरकायमात्तकान्तिम्।
गिरयो दधुरानते पङ्गे धृतरात्रिन्दिवविभ्रमास्समन्तात्।।[19]

उत्तरकायं दधुः। कायस्याधोभागमूर्ध्वभागमित्यर्थः।

**वासुदेवविजये–**

गोपेषु जात्वधिपतिर्गणकैकतीर्थमैणेयचर्मरुचिरप्रवरं विपश्चित्।
प्राप्तालयं यदुकुलीनगुरुं स गर्गं याज्यप्रियं सदकृतानतपूर्वकायः।।[20]

आनतपूर्वकायः पूर्वं कायस्य पूर्वकायः, आनतः पूर्वकायो यस्य।

**सुभद्राहरणे**

ततस्स भुक्त्वा सुखितं महर्षिं गत्वा बभाषे नतपूर्वकायः।

विलोक्यमानं प्रिययार्धदृष्ट्या पार्श्वस्थया शिष्यसुतैः परीतम्।।[21]

**चम्पूभारते**

निशि जातु निकेतवेदिकायां निकटे सुप्तिसुखं निषेव्य पार्थान्।
पथिकोऽपररात्रजागरूकः प्रबभाषे गिरमीदृशीं प्रसङ्गात्।।[22]

अपरः रात्रेरपररात्रः। अपररात्रेऽरुणोदयवेलायां जागरूकः प्रबुद्धः सन्।

**द्व्याश्रयमहाकाव्ये**

पूर्वकायेऽपरकायेऽधरकायोत्तराङ्गयोः।
स्वान्क्षुण्णान्वीक्ष्य सायाह्नाग्निवद् ग्राहारिरज्वलत्।।[23]

मध्याह्नार्कनिभः सोऽर्धदृष्ट्यैक्षिष्ट द्विषां बलम्।
दृष्ट्यर्धेन च बाहू स्वौ दंष्ट्रिकार्धं परामृशन्।।[24]

कायस्य पूर्वभागे हृदयादौ कायस्यापरभाग ऊर्वादौ कायस्याधरभागे पादादावङ्गस्योत्तरभागे मूर्धादौ क्षुण्णान्प्रहतान्। एवंकृत्वा यदि उदाहरणार्थानां विवेचनं भवति, तेन यदि क्वचित् ग्रन्थान्तरेषु उदाहरणार्थे वैमत्यं प्राप्यते चेत् तस्य निर्देशपुरस्सरं समीक्षणमपि जायते। बहुत्र तूदाहरणार्थः प्रयोगान् अवलम्ब्यैव विवेचनो भवति। यत्र च प्रयोगे मतभेदो दृश्यते तस्य निर्देशपुरस्सरं समीक्षा अपि भवति। क्वचित् शोधितपाठाश्रयेण च क्वचिच्च उदाहरणस्य प्रयोगोपस्थापनेन भूयोऽपि विशदतामानीयते इत्थं रीत्या। अतः उदाहरणकाव्यानामुपयोगिता व्याकरणोदाहरणार्थज्ञाने अतीवास्ति।

---

18 अर्जुनरावणीयम् 5.1
19 अर्जुनरावणीयम् 5.2
20 वासुदेवविजयम् 5.2
21 सुभद्राहरणम् 10.42
22 चम्पूभारतम् 2.56
23 द्व्याश्रयमहाकाव्यम् 5.50
24 द्व्याश्रयमहाकाव्यम् 5.51